॥ श्रीजिनाय नमः ॥

( श्रीचारित्रविजयगुरुभ्यो नमः )

( सान्वयं गूर्जरभाषांतरसहितं च )

# ॥ शुद्धमत्यादिचतुष्टय चरित्रं ॥

( मूलकर्ता—श्रीवर्धमानसूरिः )

अन्वय सहित गुजराती भाषांतरकर्ता पंडित श्रावक हीरालाल हंसराज ( जामनगरवाळा )

( आ ग्रंथना अन्वय तथा भाषांतरना प्रसिद्ध कर्ताए सर्व हक स्वाधिन राख्या छे )

विक्रम संवत् १९८४ किमत रु. ०-८-० सने १९२९

# श्रावकोना बार व्रतो उपर बार चरित्रो तैयार छे.

**मूल तथा अन्वय साथे गुजराती भाषांतरवाळां—कागळ नहीं वापरतां कार्ड उपर छापेलां**

( मूळकर्ता—वर्धमानसूरि )

विक्रमभूपचरित्र ( सम्यक्त्व व्रत उपर ) .... कीं. रु. ०॥
सूरचंद्रचरित्र ( अहिंसा व्रतउपर ) .... .... कीं. रु. ०॥
हंसराजचरित्र ( सत्य व्रतउपर ) .... .... कीं. रु. ०॥
लक्ष्मीपुंजसार्थवाहचरित्र ( अस्तेय व्रतउपर ) कीं. रु. ०॥
नागिलचरित्र ( ब्रह्मचर्य व्रतउपर ) .... .... कीं. रु. ०॥
विद्यापतिचरित्र ( परिग्रहप्रमाण व्रतउपर ) कीं. रु. ०॥
सिंहश्रेष्टीचरित्रं ( दिग्विरति व्रतउपर ) .... कीं. रु. ०॥
धर्मनृपचरित्र ( भोगोपभोग व्रत उपर ) .... .... कीं. रु. ०॥
सुरसेन महासेन चरित्र ( अनर्थ दंडव्रतउपर ) .... कीं. रु. ०॥
केशरिकेवलिचरित्र ( सामायिक व्रतउपर ) .... कीं. रु. ०॥
सुमित्रमंत्रिचरित्र ( देशावकाशिकव्रते ) .... .... कीं. रु. ०॥
मित्रानंदमंत्रिचरित्र ( पौषध व्रतउपर ) .... .... कीं. रु. ०॥
सुमित्राश्राविकाचरित्रं ( अतिथिसंविभाग व्रतउपर ) कीं. रु. ०॥

— आ तेर चरित्रो साथे लेनार पासेथी रु. ६) छुटक लेनार पासेथी उपर प्रमाणे —

**लखो—पंडित हीरालाल हंसराज—जामनगर.**

# ॥ अथ श्रीशुद्धमत्यादिचतुष्टय चरित्रं प्रारभ्यते ॥

( मूलकर्ता—श्रीवर्धमानसूरिः )

अन्वय सहित भाषांतर करनार तथा छपावी प्रसिद्ध करनार—पंडित श्रावक हीरालाल हंसराज.

**अनन्तजनमित्यस्ति पुरं महिमवत्तरम् । शश्वद्वसन्ति यत्पौरैरेव विश्वपुराण्यपि ॥ १ ॥**

अन्वयः—महिमवत्तरं अनंतजनं इति पुरं अस्ति, यत् पौरैः एव विश्वपुराणि अपि शश्वत् वसंति. ॥ १ ॥

अर्थः—अतिमाहात्म्यवाळुं अनंतजननामनुं नगर छे, के जे नगरना नागरिकोवडेज जगतना सघळां शेहेरो पण हमेशां (अनादिकाळथी) वसेलां छे. ॥ १ ॥

**महाकष्टमसाधूनां साधूनां संमदं ददत् । तत्र चित्रगतिर्नाम धरित्रीदयितः स्थितः ॥ २ ॥**

अन्वयः—तत्र असाधूनां महाकष्टं, साधूनां संमदं ददत् चित्रगतिः नाम धरित्री दयितः स्थितः. ॥ २ ॥

अर्थः—त्यां दुर्जनोने महान् कष्ट आपनारो, अने सज्जनोने आनंद आपनारो चित्रगतिनामनो राजा रहेलो छे. ॥ २ ॥

**पुरेऽत्र कष्टं तिष्टंन्तः क्वापि सौख्याय गम्यताम् (गच्छत) । इत्युक्तास्तेन चत्वारः पौरा निरगुरेकदा ३**

अन्वयः—अत्र पुरे कष्टं तिष्टंतः चत्वारः पौराः "सौख्याय क्व अपि गम्यतां" इति एकदा तेन उक्ताः निरगुः. ॥ ३ ॥
अर्थः—ते नगरमां दुःखे रहेता एवा चार नागरिकोने "तमो सुख मेळववामाटे क्यांक जाओ? एम एक दिवसे ते राजाए कहेवाथी, तेओ त्यांथी निकळी गया. ॥ ३ ॥

**ते तु शुद्धमतिर्योग्यमतिर्मन्दमतिस्तथा । दुर्मतिश्चेति कुग्रामेष्वजीवन्कर्मवृत्तितः ॥ ४ ॥**

अन्वयः—शुद्धमतिः, योग्यमतिः, मंदमतिः, तथा दुर्मतिः च, इति ते तु कुग्रामेषु कर्म वृत्तितः अजीवन्. ॥ ४ ॥
अर्थः—शुद्धमति, योग्यमति, मंदमति अने दुर्मति नामना ते चारे नागरिको कोइक न्हाना गांमडांओमां जइ मजूरी करीने (पोतपोतानी) आजीविका चलाववा लाग्या. ॥ ४ ॥

**कामं वृत्त्यै भ्रमन्तस्ते शीतवातातपेष्वपि । रत्नद्वीपं ययुः कष्टार्जिताल्पद्रव्यशम्बलाः ॥ ५ ॥**

अन्वयः—शीत वात आतपेषु अपि कामं वृत्त्यै भ्रमंतः ते कष्ट अर्जित द्रव्य शंबलाः रत्न द्वीपं ययुः. ॥ ५ ॥
अर्थः—ठंडी, वायु तथा तडकामां पण अति मेहेनतथी आजीविकामाटे भमता एवा तेओ केटलीक मुश्केलीए मेळवेलुं (थोडुं घणुं) द्रव्य साथे लेइने रत्नद्वीपमां गया. ॥ ५ ॥

**कुशैलेषु दृषत्खण्डान्सत्रासानल्पतेजसः । रत्नभ्रमेण गृह्णन्तो मूढा मुमुदिरेऽत्र ते ॥ ६ ॥**

अन्वयः—अत्र ते मूढाः कुशैलेषु सत्रासान्, अल्प तेजसः दृषत् खंडान् रत्न भ्रमेण गृह्णंतः मुमुदिरे. ॥ ६ ॥
अर्थः—अहीं ते मूर्खाओ नकामा पहाडोमां पडेला पासादार, तथा स्वल्प तेजवाळा पत्थरोना टुकडाओने (पांचीकाओने) रत्नोनी भ्रांतिथी लेइने खुशी थवा लाग्या. ॥ ६ ॥

तैरलोकि पुमान्कोऽपि दिव्याभरणभासुरः । तरुच्छायास्थितः सारपरिवारो महानिह ॥ ७ ॥

अन्वयः–इह तैः दिव्य आभरण भासुरः, सार परिवारः, कः अपि महान् पुमान तरु च्छाया स्थितः अलोकि. ॥ ७ ॥

अर्थः–पछी त्यां तेओए दिव्य आभूषणोथी शोभता, अने उत्तम परिवारवाळा कोइक महान पुरुषने वृक्षनी छायामां बेठेलो जोयो.

प्रीणितस्वान्तया नुन्नः कान्तयाथ प्रशान्तया । असत्योक्तिनिशाभानुस्तानुवाच पुमानयम् ॥ ८ ॥

अन्वयः–अथ प्रीणित स्वांतया प्रशांतया कांतया नुन्नः असत्य उक्ति निशा भानुः अयं पुमान् तान् उवाच. ॥ ८ ॥

अर्थः–पछी खुशी थयेलां हृदयवाळी शांतिनामनी स्त्रीथी प्रेरायेला, तथा असत्य वचनरूपी रात्रिनो विनाश करवामां सूर्यसरखा ते पुरुषे तेओने कह्युं के, ॥ ८ ॥

किमेभिरश्मखण्डैर्वो रोचितैः पामरोचितैः । न स्पृशन्ति करेणापि यानि पौराः परीक्षकाः ॥ ९ ॥

अन्वयः–वः रोचितैः पामर उचितैः एभिः अश्मखंडैः किं? यानि परीक्षकाः पौराः करेण अपि न स्पृशंति. ॥ ९ ॥

अर्थः—तमोने गमेलां, पामरोने लेवायोग्य आ पांचीकाओथी शुं (लाभ थवानो छे?) के जेने परीक्षक नागरीको हाथ पण अडकाडता नथी. ॥ ९ ॥

इतोऽग्रतोऽस्ति माणिक्यगिरिर्गुरुगुणालयः । यत्प्रभासु न भासन्ते तमांसि च महांसि च ॥ १० ॥

अन्वयः–इतः अग्रतः गुरु गुण आलयः माणिक्य गिरिः अस्ति, यत् प्रभासु तमांसि च महांसि च न भासंते. ॥ १० ॥

अर्थः–अहींथी आगळ महान् गुणोना स्थानरूप माणिक्यगिरि नामनो पर्वत छे, के जेना तेज आगळ अंधकार अने (सूर्यनो)

प्रकाश पण देखाता नथी. ॥ १० ॥

**यदि तं याथ रत्नानि लभध्वे तानि तानि तत् । येषां महीयोमहसां महीयं मूल्यमल्पकम् ॥ ११ ॥**

अन्वयः–यदि तं याथ, तत् तानि तानि रत्नानि लभध्वे, महीयः महसां येषां महीयं मूल्यं अल्पकं. ॥ ११ ॥

अर्थः–जो तमो त्यां जाओ, तो तमोने एवां एवां (अमूल्य) रत्नो मळे, के महान तेजवाळां एवां तेओनुं जेटलुं महान् मूल्य कहीयें तेटलुं थोडुं छे. ॥ ११ ॥

**अथ शुद्धमतिर्दध्यौ साधु दिष्टमनेन मे । व्यक्तं परोपकारार्थमेव जीवितमीदृशाम् ॥ १२ ॥**

अन्वयः–अथ शुद्धमतिः दध्यौ, अनेन मे साधु दिष्टं, ईदृशां जीवितं व्यक्तं पर उपकार अर्थ एव. ॥ १२ ॥

अर्थः–(ते सांभळी) शुद्धमतिए विचार्युं के, आ माणसे मने साचुं कह्युं छे, केमके एवा माणसोनुं जीवन प्रगटपणे परोपकार-माटेज होय छे. ॥ १२ ॥

**तदस्यादेशमाधाय दारिद्र्याय ददे जलम् । इति ध्यात्वा चचालासौ माणिक्याचलदिङ्मुखः ॥ १३ ॥**

अन्वयः—तत् अस्य आदेशं आधाय दारिद्र्याय जलं ददे, इति ध्यात्वा माणिक्य अचल दिङ्मुखः असौ चचाल. ॥ १३ ॥

अर्थः–(पछी) आ पुरुषनी आज्ञा मानीने हुं मारां दारिद्र्यने जलांजलि आपुं, एम विचारीने ते माणिक्यपर्वतनी दिशातरफ चालवा लाग्यो. ॥ १३ ॥

**तस्मै रत्नार्थिने खानिखननार्थमथार्पयत् । पुमान्स दिव्यः कुद्दालं तीव्रत्वालंकृतं कृती ॥ १४ ॥**

अन्वयः—अथ सः कृती दिव्यः पुमान् रत्न अर्थिने तस्मै खानि खननार्थं तीव्रख अलंकृतं कुदालं अर्पयत्. ॥ १४ ॥

अर्थः-पछी ते कृतज्ञ दिव्य पुरुषे रत्नो मेळववानी इच्छावाळा एवा ते शुद्धमतिने (त्यां ते रत्नोनी) खाण खोदवामाटे सजेली धारथी शोभिती कोदाळी आपी. ॥ १४ ॥

**माणिक्याचलमासाद्य माद्यद्रोमाञ्चकञ्चुकः । अवापैष खनन्खानी रत्नानीह त्विषां गृहम् ॥ १५ ॥**

अन्वयः—एषः माणिक्य अचलं आसाद्य माद्यत् रोमांचकंचुकः खानीः खनन इह त्विषां गृहं रत्नानि अवाप. ॥ १५ ॥

अर्थः-(त्यां) ते रोहणाचलपासे जइ, हर्षथी रोमांचित थइ खाण खोदवा लाग्यो, अने त्यांथी तेजनां स्थानसरखां रत्नो तेने मळ्यां.

**कालेनाप्यतिकष्टेनाप्यहं रत्नममूल्यकम् । तद् ग्रहीष्येऽधुना येन लभ्यते सुखमक्षयम् ॥ १६ ॥**

**इति ध्यात्वातिकष्टासु माणिक्याचलसीमसु । ददत्पदानि संप्राप शिखरं तस्य स क्रमात् ॥१७॥ युग्मं॥**

अन्वयः-अतिकष्टेन अपि अहं कालेन अपि तत् अमूल्यकं रत्नं ग्रहीष्ये, येन अधुना अक्षयं सुखं लभ्यते, ॥ १६ ॥ इति ध्यात्वा अति कष्टासु माणिक्य अचल सीमसु पदानि ददत् सः क्रमात् तस्य शिखरं संप्राप. ॥ १७ ॥ युग्मं ॥

अर्थः-अति दुःख वेठीने पण हुं (केटलेक) काळे पण तेवुं अमूल्य रत्न ग्रहण करीश के, जेथी तुरत अक्षय सुख मळे, ॥१६॥ एम विचारीने अति प्रयासवाळी एवी ते रोहणाचलनी हदमां पग मूकतो थको (चालतो थको) ते अनुक्रमे तेना शिखरपर पहोंच्यो. ॥ १७ ॥ युग्मं ॥

**यन्माहात्म्येन तन्वन्ति सेवां देवाधिपा अपि । रत्नं तेनेह तत्किंचिदुदञ्चद्रोचिरैक्ष्यत ॥ १८ ॥**

अन्वयः—यत् माहात्म्येन देव अधिपाः अपि सेवां तन्वंति, तत् उदंचत् रोचिः रत्नं तेन इह ऐक्ष्यत. ॥ १८ ॥

अर्थः—जेना प्रभावथी इंद्रो पण सेवा करे, एवां चळकता तेजवाळां रत्नने तेणे अहीं जोयुं ॥ १८ ॥

**महतस्तस्य रत्नस्य दर्शनादेव शुद्धधीः । विश्वत्रयस्याप्युपरि स्फुरितं स्वममन्यत ॥ १९ ॥**

अन्वयः—तस्य महतः रत्नस्य दर्शनात् एव शुद्धधीः स्वं विश्व त्रयस्य अपि उपरि स्फुरितं अमन्यत. ॥ १९ ॥

अर्थः—ते महान रत्नने जोवाथीज ते शुद्ध बुद्धि पोताना आत्माने त्रणे जगतनी उपर रहेलो मानवा लाग्यो. ॥ १९ ॥

**तच्चालोक्यातियत्नेन रत्नमुत्पुलकाकृतिः । धीरो निश्चयधीश्चेतस्येतच्चिन्तयति स्म सः ॥ २० ॥**

अन्वयः—च तत् रत्नं अति यत्नेन आलोक्य उत्पुलक आकृतिः, निश्चयधीः सः धीरः चेतसि एतत् चिंतयतिस्म. ॥ २० ॥

अर्थः—पछी ते रत्नने अति प्रयत्नपूर्वक जोइने रोमांचित थयेलो, अने निश्चय बुद्धिवाळो ते मनमां एम विचारवा लाग्यो के,

**स एव ज्ञानवान्पुण्यः कृपागारो गुरुः पुमान् । येनेदृग्रत्नपात्रं मे कथितः पृथिवीधरः ॥ २१ ॥**

अन्वयः—सः एव पुमान् ज्ञानवान्, पुण्यः, कृपा आगारः गुरुः, येन ईदृग् रत्नपात्रं पृथिवी धरः मे कथितः. ॥ २१ ॥

अर्थः—तेज पुरुष ज्ञानी, पवित्र, अने दयाना स्थानरूप गुरु छे, के जेणे आवां रत्नोनां भाजनरूप आ पर्वत मने कह्यो (देखाड्यो).

अयमेव च रत्नाद्रिः सेव्यो रत्नार्थिभिर्नृभिः । स्युः सर्वेष्वपि शैलेषु रत्नानि कविवागियम् ॥ २२ ॥

अन्वयः–च रत्न अर्थिभिः नृभिः अयं एव रत्न अद्रिः सेव्यः, सर्वेषु अपि शैलेषु रत्नानि स्युः, इयं कवि वाक्. ॥ २२ ॥

अर्थः—हवे रत्नोना इच्छक पुरुषोए आज रत्नाचलने सेववो जोइये, वळी सर्वकोइ पर्वतोमां रत्नो होय छे, एवी कविओनी वाणी छे. ॥ २२ ॥

देवः स एव यः कश्चिदस्याद्रेरधिदैवतम् । देवत्वं क्वान्यदेवानां येषां न स्थानमीदृशम् ॥ २३ ॥

अन्वयः–अस्य अद्रेः यः कश्चित् अधिदैवतं, सः एव देवः, अन्य देवानां देवत्वं क्व? येषां ईदृशं स्थानं न. ॥ २३ ॥

अर्थः—आ पर्वतनो जे कोइ अधिष्टायक देव छे, तेज ( खरो ) देव छे, बीजा देवोने देवपणुं क्यांथी प्राप्त थाय? के जेओने आवुं स्थान मळ्युं न होय. ॥ २३ ॥

रुचिप्रचितविश्वेऽस्मिन्नपि माणिक्यभूभृति । तमःसमलदृष्टीनामस्ति नास्तीति संशयः ॥ २४ ॥

अन्वयः–रुचि प्रचित विश्वे अस्मिन् माणिक्य भूभृति अपि, तमः समल दृष्टीनां अस्ति, नास्ति इति संशयः. ॥ २४ ॥

अर्थः—कांतिथी भरेलुं छे जगत जेणे, एवा पण आ माणिक्याचलना संबंधमां, अज्ञानरूपी अंधकारथी मलीन चक्षुवाळाओने, ते छे के, नथी एवो संशय रहेछे. ॥ २४ ॥

दृष्ट्वैनमपि रत्नाद्रिं गिरीनाकाङ्क्षतोऽपरान् । अन्धदृष्टेर्जनस्यास्य कान्तौ ध्वान्तेऽपि नो भिदा ॥ २५ ॥

अन्वयः–एनं रत्न अद्रि दृष्ट्वा अपि अपरान् गिरीन् आकांक्षतः, अस्य अंध दृष्टेः जनस्य कांतौ ध्वांते अपि भिदा नो. ॥२५॥

अर्थः—आ रत्नाचलने जोइने पण बीजा पर्वतोने इच्छता, एवा ते अंधदृष्टि माणसोने प्रकाश अने अंधकारमां कंइ भेद जणातो नथी.

अयमप्यस्ति रम्योऽद्रिस्तथान्येऽप्यद्रयोऽद्भुताः । यस्य स्याद्विचिकित्सेति स किं पापैर्न लिप्यते ॥२६॥

अन्वयः—अयं अद्रिः अपि रम्यः अस्ति, तथा अन्ये अपि अद्भुताः अद्रयः, यस्य इति विचिकित्सा स्यात् सः पापैः किं न लिप्यते? ॥ २६ ॥

अर्थः–जेम आ पर्वत पण सारो छे तेम बीजा पर्वतो पण सारा छे, एवी जे परीक्षा करेछे, ते पापोथी केम लींपाय नहि? ॥२६॥

धन्या अन्याद्रिभाजोऽपि यत्नाद्रत्नान्यवाप्नुयुः । इति वार्तापि हास्याय हा स्यादेतद्गिरिस्पृशाम् ॥२७॥

अन्वयः–अन्य अद्रि भाजः अपि धन्याः यत्नात् रत्नानि अवाप्नुयुः, इति वार्ता अपि हा? एतत्गिरि स्पृशां हास्याय. ॥२७॥

अर्थः—बीजा पर्वतोमां रहेनारा भाग्यशालीओ पण प्रयत्नथी रत्नो मेळवी शके छे, एवी वार्ता पण अरेरे! आ पर्वतवासीओने हास्य उपजावे छे. ॥ २७ ॥

अन्याचलचरैः पुंभिरेतद्गिरिचरा नराः । दर्शनेनापि लज्जेरन्सहेरन्संस्तवं कुतः ॥ २८ ॥

अन्वयः–अन्य अचल चरैः पुंभिः एतत् गिरि चराः नराः दर्शनेन अपि लज्जेरन्, संस्तवं कुतः सहेरन् ? ॥ २८ ॥

अर्थः–बीजा पर्वतोमां फरनारा पुरुषो, आ पर्वतमां फरनारां पुरुषोने नजरे जोवामां पण शरमींदा थाय छे, तो पछी तेमनी प्रशंसाने तेओ क्यांथी सहन करी शके ? ॥ २८ ॥

**धन्योऽहं कृतकृत्योऽहं लब्धजन्मफलोऽप्यहम् । येनासामान्यमाहात्म्यं रत्नमेतदवाप्यते ॥ २९ ॥**

अन्वयः–अहं धन्यः, अहं कृत कृत्यः, अहं लब्ध जन्म फलः अपि, येन असामान्य माहात्म्यं एतत् रत्नं अवाप्यते. ॥ २९ ॥

अर्थः–हुं धन्य छुं, हुं कृतार्थ छुं, अने मने आ मनुष्यजन्मनुं फल पण प्राप्त थयुं छे, के जेने असाधारण महिमावाळुं आ (अमूल्य) रत्न प्राप्त थयुं छे. ॥ २९ ॥

**धिग्निर्भाग्यं जडमतिं मां पुरा येन वासराः । अगम्यन्ततमां हन्त रत्नैस्तैरप्युपार्जितैः ॥ ३० ॥**

अन्वयः–हंत निर्भाग्यं जडमतिं मां धिक्, येन पुरा उपार्जितैः तैः रत्नैः अपि वासराः अगम्यंततमां. ॥ ३० ॥

अर्थः–अरेरे ! वळी निर्भागी जडबुद्धिवाळा एवा मने धिक्कार छे ! के जेणे पूर्वे उपार्जन करेलां तेवां रत्नोथी पण दिवसोने (नकामा) गुमाव्या. ॥ ३० ॥

**इति ध्यायन्हृदि दधौ स तद्रत्नं सुनिश्चलम् । अच्छिद्रमपि यत्प्रोतमनन्तैरमलैर्गुणैः ॥ ३१ ॥**

अन्वयः–इति हृदि ध्यायन् सः सुनिश्चलं तत् रत्नं दधौ, यत् अच्छिद्रं अपि अनंतैः अमलैः गुणैः प्रोतं. ॥ ३१ ॥

अर्थः—एम मनमां विचारता एवा ते शुद्धबुद्धिए ते रत्नने बहुज साचवीने राख्युं, के जे रत्न छिद्ररहित होवा छतां पण अनंता निर्मल गुणोवडे ( दोराओवडे ) परोवायेलुं हतुं. ॥ ३१ ॥

**सुरासुरार्च्यामृद्धिं स प्राप तद्रत्नधारणात् । अचिन्त्यमहिमानो हि मणिमन्त्रौषधीगुणाः ॥ ३२ ॥**

अन्वयः—तद् रत्न धारणात् सः सुर असुर अर्च्यां ऋद्धिं प्राप, हि मणि मंत्र औषधी गुणाः अचिंत्य महिमानः. ॥ ३२ ॥

अर्थः—ते रत्नने धारण करवाथी ते देवो अने दानवोथी पण पूजाती समृद्धिने पाम्यो, केमके मणि, मंत्रो अने औषधीओना गुणो अगम्य माहात्म्यवाळा होय छे. ॥ ३२ ॥

**स प्रतिक्षणतत्सङ्गसुखनिर्भरभावनः । महानन्दमपि प्राप किं न भाग्यभृतां भवेत् ॥ ३३ ॥**

अन्वयः—प्रतिक्षण तत् संग सुख निर्भर भावनः सः महानंदं अपि प्राप, भाग्यभृतां किं न भवेत् ? ॥ ३३ ॥

अर्थः—क्षणक्षणप्रते तेना संगना सुखमां अति श्रद्धा राखनारो ते शुद्धबुद्धि अतिआनंदमय ( मोक्षने ) प्राप्त थयो, ( केमके ) भाग्यशाळीओने शुं प्राप्त थतुं नथी ? ॥ ३३ ॥

**यस्तु योग्यमतिः सोऽपि दिव्यपुंसो गिरां गुणैः । प्रीतः शुद्धमतिं मूलाच्चालोक्य प्राप्तनिश्चयः ॥३४॥**

**पूर्ववल्लब्धकुद्दालः खानीर्ज्ञाताः खनञ्शनैः । कृतयत्नोऽपि रत्नौघं बहुमूल्यमवाप च ॥ ३५ ॥ युग्मम् ॥**

अन्वयः–तु यः योग्यमतिः, सः अपि दिव्य पुंसः गिरां गुणैः प्रीतः, च मूलात् शुद्धमतिं आलोक्य प्राप्त निश्चयः, ॥ ३४ ॥ पूर्ववत् लब्ध कुद्दालः, ज्ञाताः खानीः शनैः खनन्, च कृत यत्नः बहु मूल्यं रत्न ओघं अपि अवाप. ॥ ३५ ॥ युग्मं ॥

अर्थः—पछी जे योग्यमति छे, ते पण ते दिव्य पुरुषनी वाणीना गुणोथी खुशी थइने, तथा पेहेलेथी शुद्धमतिनी स्थिति जोवाथी खातरी थयाबाद, ॥ ३४ ॥ ते शुद्धमतिनीपेठे कोदाळी लेइने, प्रसिद्ध खाणोने धीमेधीमे खोदतोथको, प्रयत्न करवाथी अतिकीमती रत्नोना समूहने पण प्राप्त थयो. ॥ ३५ ॥ युग्मं ॥

**रत्नमूल्यसुखस्वादः परं किंचिदभूदसौ । तत्र लोकोत्तरं रत्नं लब्धुमादरमादधौ ॥ ३६ ॥**

अन्वयः–असौ किंचित् रत्न मूल्य सुख स्वादः अभूत्, परं तत्र लोक उत्तरं रत्नं लब्धुं आदरं आदधौ. ॥ ३६ ॥

अर्थः–ते योग्यमति ते रत्ननी किमतथी कंइक सुखना स्वादवाळो तो थयो, परंतु ( पाछो ) लोकोत्तर ( अमूल्य ) रत्न मेळववा माटे ते प्रयत्न करवा लाग्यो. ॥ ३६ ॥

**गत्वा किंचित्पुरं दिव्यं रत्नाप्तश्रीः स्थितः सुखम् । स ईहासहसंपन्नभोगयोगश्चिरं स्थिरः ॥ ३७ ॥**

अन्वयः–किंचित् दिव्यं पुरं गत्वा, रत्न आप्त श्रीः सः ईहा सह संपन्न भोग योगः चिरं स्थिरः सुखं स्थितः. ॥ ३७ ॥

अर्थः–(पछी) कोइक दिव्य नगरमां जइने, ते रत्नथी मळेली लक्ष्मीवाळो थयो थको ते योग्यमति इच्छामुजब मळेला भोगोने भोगवतो थको घणा काळसुधी स्थिर थइने सुखेथी ( त्यां ) रह्यो. ॥ ३७ ॥

क्षीणश्रीः प्राप्य रत्नानि श्रिये माणिक्यशैलतः । जगाम कामं दिव्यानि भूयो भूयः पुराणि सः ॥३८॥

अन्वयः—क्षीण श्रीः श्रिये माणिक्य शैलतः रत्नानि प्राप्य, भूयः भूयः सः कामं दिव्यानि पुराणि जगाम. ॥ ३८ ॥

अर्थः—वळी निर्धन थवाथी द्रव्य मेळववामाटे ते माणिक्याचलमांथी रत्नो मेळवी मेळवीने वारंवार ते योग्यमति सुखेसमाधे ते दिव्य नगरोमां जवा लाग्यो. ॥ ३८ ॥

रत्नद्वीपे स माणिक्यगिरिं गत्वा कदाचन । सप्ताष्टवारसंचारखिन्नश्चेतस्यचिन्तयत् ॥ ३९ ॥

अन्वयः—कदाचन सः रत्नद्वीपे माणिक्य गिरिं गत्वा, सप्त अष्ट वार संचार खिन्नः चेतसि अचिंतयत्. ॥ ३९ ॥

अर्थः—पछी एकदिवसे तो ते योग्यमति रत्नद्वीपमां रहेला ते माणिक्याचलपर जइने, सात आठवार ( त्यां ) आववा जवाथी थाकीने मनमां विचारवा लाग्यो के, ॥ ३९ ॥

पुंसा दिव्येन मे तावदधुनापि हितैषिणा । अमूल्यरत्नमादिष्टं नित्यसौख्यस्य कारणम् ॥ ४० ॥

अन्वयः—अधुना अपि हितैषिणा दिव्येन पुंसा मे तावत् नित्य सौख्यस्य कारणं अमूल्य रत्नं आदिष्टं. ॥ ४० ॥

अर्थः—हजु पण ( मारुं ) हित इच्छता ते दिव्य पुरुषे मने तो शाश्वत सुखनुं कारणभूत अमूल्य रत्न लेनुंवा कह्युं छे. ॥ ४० ॥

ततस्तल्लब्धये यत्नं कुर्वे चक्रे च तं तथा । प्राप्यामूल्यं च तद्रत्नं स शुद्धमतिवल्लभो ॥ ४१ ॥

अन्वय.—ततः तत् लब्धये यत्नं कुर्वे, च तथा तं चक्रे, च तत् अमूल्यं रत्नं प्राप्य सः शुद्धमतिवत् बभौ. ॥ ४१ ॥

अर्थः—माटे ते मेळववामाटे हुं प्रयत्न करुं, ( एम विचारी ) पछी तेणे तेवोज प्रयत्न कर्यो अने ते अमूल्य रत्न मेळवीने ते (पण) शुद्धमतिनीपेठेज शोभवा लाग्यो. ॥ ४१ ॥

**यस्तु मन्दमतिर्नाम स दिव्यपुरुषोक्तिषु । ईदृग्विमर्शस्पर्शेन वितेने तरलं मनः ॥ ४२ ॥**

अन्वयः—यः तु मंदमतिः नाम, सः दिव्य पुरुष उक्तिषु, ईदृग् विमर्श स्पर्शेन मनः तरलं वितेने. ॥ ४२ ॥

अर्थः—हवे जे मंदमतिनामनो मनुष्य हतो, ते तो ते दिव्य पुरुषना वचनोमाटे नीचे मुजब विचार करतोथको मनने चपल करवा लाग्यो के, ॥ ४२ ॥

**प्रत्यक्षाणि परिक्षिप्य रत्नान्येतानि रुक्पदम् । लगेद्वाक्येऽस्य कः सत्यासत्यसंशयगोचरे ॥ ४३ ॥**

अन्वयः—रुक् पदं एतानि प्रत्यक्षाणि रत्नानि परिक्षिप्य अस्य सत्य असत्य संशय गोचरे वाक्ये कः लगेत्. ॥ ४३ ॥

अर्थः—तेजनां स्थानरूप आ प्रत्यक्ष देखातां रत्नोने ( पांचीकाओने ) फेंकी देइने आ पुरुषना साचाखोटाना संदेहवाळा वचनमां कोण विश्वास राखे? ॥ ४३ ॥

**इति निश्चित्य तैरेव ग्रावखण्डैरखण्डमुत् । पुरं गन्तुमना दिव्यं क्वचित्पल्लीं पपात सः ॥ ४४ ॥**

अन्वयः—इति निश्चित्य तैः एव ग्रावखंडैः अखंड मुत्, दिव्यं पुरं गंतुमनाः सः क्वचित् पल्लीं पपात. ॥ ४४ ॥

अर्थः—एवो निश्चय करीने तेज पत्थरना टुकडाओथी (पांचीकाओथी) अनुपम सुख मानतोथको दिव्यनगरमां जवाने इच्छतां छतां पण ते कोइक (भीलोनी) पल्लीमां जइ वस्यो. ॥ ४४ ॥

**ततस्तदुचितप्राप्तस्वल्पमूल्योपभोगभुक्। निनाय स दिनान्यत्र संकरे सुखदुःखयोः ॥ ४५ ॥**

अन्वयः–ततः तत् उचित प्राप्त स्वल्प मूल्य उपभोग भुक् सः, अत्र सुख दुःखयोः संकरे दिनानि निनाय. ॥ ४५ ॥

अर्थः—पछी ते पांचीकाओनी किमतजेटलांज स्वल्प द्रव्यथी भोगो भोगवतोथको ते त्यांज सुखदु खना संगमवाळा दिवसो वीताडवा लाग्यो. ॥ ४५ ॥

**भुक्तश्रीर्यत्र तत्रापि स भ्रमन्नभ्रवत्पुनः। रत्नद्वीपं ययौ दैवाद्ग्रावखण्डान्यवाप च ॥ ४६ ॥**

अन्वयः–भुक्त श्रीः सः अभ्रवत् यत्र तत्र भ्रमन अपि पुनः दैवात् रत्न द्वीपं ययौ, च ग्राव खंडानि अवाप. ॥ ४६ ॥

अर्थः–ते द्रव्य खवाइ गयाबाद ते मंदमति वादळांनीपेठे ज्यां त्यां भमतोथको पण पाछो दैवयोगे रत्नद्वीपमां गयो, अने (त्यांथी) तेणे (पाछा) ते पत्थरोना टुकडा मेळव्या. ॥ ४६ ॥

**ततस्तदुचितावाप्तस्थानश्रीदुःखजीवनः। गतागतशतान्येवं हताशः प्रततान सः ॥ ४७ ॥**

अन्वयः–ततः तत् उचित अवाप्त स्थान श्री दु ख जीवनः सः हताशः एवं गत आगत शतानि प्रततान. ॥ ४७ ॥

अर्थः—पछी ते पांचीकाओने योग्य स्थान अने द्रव्य मेळवीने दुःखे जींदगी गुजारतोथको निराश थइने ते एवीरीते सेंकडो-

वार आवजाव करवा लाग्यो. ॥ ४७ ॥

**सोऽपि कालेन निर्विण्णस्तन्वानो दिव्यपुंवचः । माणिक्यगिरिमाश्रित्य भेजे शुद्धमतेर्गतिम् ॥ ४८ ॥**

अन्वयः–सः अपि कालेन निर्विण्ण, दिव्य पुं वचः तन्वानः माणिक्य गिरिं आश्रित्य शुद्धमतेः गतिं भेजे. ॥ ४८ ॥

अर्थः—पछी ते पण केटलेक काळे थाकीने, ते दिव्य पुरुषना कहेवामुजब वर्तीने, तथा ते माणिक्याचलनो आश्रय लेइने शुद्धमतिनी गति (मोक्ष) पाम्यो. ॥ ४८ ॥

**यस्तु दुर्मतिराकर्ण्य स दिव्यपुरुषस्य गाम् । स्वनामार्हविचारेऽत्र स्थिरं व्यरचयन्मनः ॥ ४९ ॥**

अन्वयः–तु यः दुर्मतिः, सः दिव्य पुरुषस्य गां आकर्ण्य अत्र स्व नाम अर्ह विचारे मनः स्थिरं व्यरचयत्. ॥ ४९ ॥

अर्थः—हवे जे दुर्मति नामनो (चोथो माणस हतो) तेणे तो ते दिव्य पुरुषनी वाणी सांभळीने, पोताना नामने लायक एवा (नीचे मुजब) दुष्ट विचारोमांज (पोतानुं) मन स्थिर कर्युं. ॥ ४९ ॥

**महत्त्वं माययापन्नः कोऽप्ययं मायिकः पुमान् । विप्रतारयति स्वैरं रत्नद्वीपचरान्नरान् ॥ ५० ॥**

अन्वयः–मायया महत्त्वं आपन्नः अयं कः अपि मायिकः पुमान् रत्नद्वीप चरान् नरान् स्वैरं विप्रतारयति. ॥ ५० ॥

अर्थः—कपटथी म्होटाइ पामेलो आ कोइक कपटी पुरुष रत्नद्वीपमां विचरनारा पुरुषोने पोतानी मरजी मुजब ठग्या करे छे.।५०।

**विलोभ्य कोमलोक्त्यायमायातं जनमादरात् । नीत्वा क्वचन गृह्णाति शम्बलं स्वमपि क्षणात् ॥ ५१ ॥**

अन्वय:–अयं आयातं जनं कोमल उक्त्या आदरात् विलोभ्य, क्वचन नीत्वा क्षणात् स्वं शंबलं अपि गृह्णाति. ॥ ५१ ॥

अर्थ —ते पुरुष आवेला माणसने कोमल वचनथी आदरमानपूर्वक ललचावीने, क्यांक उपाडी जइ क्षणवारमां तेनी पोतानी मूडी पण खुंचवी ले छे. ॥ ५१ ॥

**पापाचारे विचारेऽस्मिन्निश्चलं रचयन्मनः । रत्नद्वीपस्य पन्थानमप्यमुञ्चत दुर्मतिः ॥ ५२ ॥**

अन्वय:–अस्मिन् पाप आचारे मनः निश्चलं रचयन् दुर्मतिः रत्नद्वीपस्य पंथानं अपि अमुंचत. ॥ ५२ ॥

अर्थः—एवी रीतना दुष्ट आचरणमां ( पोतानुं ) मन स्थिर करतांथकां ते दुर्मतिए रत्नद्वीपना मार्गनो पण त्याग कर्यो. ॥ ५२ ॥

**कूपावर्तशिलागर्तपङ्ककण्टकसंकटे । स महागहनेऽरण्ये कचिन्निःपुण्यकोऽपतत् ॥ ५३ ॥**

अन्वयः—सः निःपुण्यकः क्वचित् कूप आवर्त शिला गर्त पंक कंटक संकटे महागहने अरण्ये अपतत्. ॥ ५३ ॥

अर्थ.—ते निर्भागी दुर्मति कोइक कूवा, घूना, खडको, खाडा, कादव, तथा कांटाओथी भरेला अति भयंकर जंगलमां जइ पड्यो.

**दुष्टजीवघटाघट्टकष्टितस्तेषु तेषु च । दुःस्थानेषु पतञ्जज्ञेऽरण्यान्निर्गन्तुमक्षमः ॥ ५४ ॥**

अन्वयः—च दुष्ट जीव घटा घट्ट कष्टितः, तेषु तेषु दुःस्थानेषु पतन् अरण्यात् निर्गंतुं अक्षमः जज्ञे. ॥ ५४ ॥

अर्थः–पछी ( त्यां ) घातकी प्राणीओनी श्रेणिना समागमथी दुःखी थयोथको (उपर वर्णवेलां) ते ते दुःस्थानोमां पडतो आखडतो ते जंगलमांथी वहार निकळीज शक्यो नही. ॥ ५४ ॥

आकर्ण्य धीधनैरेतदन्तरङ्गनिदर्शनम् । ततः प्रथमवद्भाव्यं न पुनश्चरमो यथा ॥ ५५ ॥

अन्वयः—ततः एतत् अंतरंग निदर्शनं आकर्ण्य धी धनैः प्रथमवत् भाव्यं, पुनः यथा चरमः, न. ॥ ५५ ॥

अर्थः—माटे आ अंतरंग दृष्टांत सांभळीने बुद्धिवानोए पेहेला शुद्धमतिपुरुषनीपेठे थवुं, परंतु छेल्ला दुर्मतिपुरुषसरखुं थवुं नही. ।५५।

निगोदवसनं यत्तदनन्तजनपत्तनम् । तत्र कालपरीणामो नाम चित्रगतिर्नृपः ॥ ५६ ॥

अन्वयः—यत् निगोद वसनं, तत् अनंत जनपत्तनं, तत्र काल परीणामः चित्रगतिः नाम नृपः. ॥ ५६ ॥

अर्थः—जे निगोदमां निवास, तेने अनंतजननामनुं नगर जाणवुं, अने त्यां कालपरीणामरूप चित्रगतिनामनो राजा जाणवो.

भव्यस्तद्भवसिद्धोऽसौ जीवः शुद्धमतिस्तु यः । आसन्नसिद्धिको योग्यमतिर्भव्योपमः स च ॥ ५७ ॥

अन्वयः—तु यः शुद्धमतिः, असौ तद् भव सिद्धः भव्यः जीवः, च योग्यमतिः, सः आसन्न सिद्धिकः भव्य उपमः. ॥ ५७ ॥

अर्थः—वळी जे शुद्धमति छे, तेने तेज भवमां मोक्षे जानारो भव्य जीव जाणवो, अने जे योग्यमति छे, तेने नजदीक सिद्धिवाळो भव्यजीवसरखो जाणवो. ॥ ५७ ॥

दूरभव्यस्त्वसौ मन्दमतिर्मन्दगतिर्भवे । अभव्यो दुर्मतिर्ज्ञेयोऽनन्तसंसारदुःखभाक् ॥ ५८ ॥

अन्वयः—तु मंदमतिः, असौ भवे मंद गतिः दूरभव्यः, दुर्मतिः अनंत संसार दुःख भाक् अभव्यः ज्ञेयः. ॥ ५८ ॥

अर्थः—वळी जे मंदमति छे, तेने संसारमां धीमी गतिवाळो दूरभव्य जाणवो, अने जे दुर्मति छे, तेने अनंता संसारमां भमी दुःख भोगवनारो अभव्य प्राणी जाणवो. ॥ ५८ ॥

**जीवाश्चतुर्विधाः कालपरिणामवशादमी । आजग्मुर्व्यवहाराख्यराशौ ते कथमप्यथ ॥ ५९ ॥**

अन्वयः-अथ ते अमी चतुर्विधाः जीवाः कथं अपि कालपरिणाम वशात् व्यवहार आख्य राशौ आजग्मुः. ॥ ५९ ॥

अर्थः-पछी ते आ चारे प्रकारना जीवो केटलेक प्रयासे ते कालपरिणाम राजानी मेहेरबानीथी व्यवहारनामनी राशिमां आव्या.

**कुग्रामाः कुभवास्तापशीतवातादिकष्टजम् । अकामनिर्जरापुण्यमल्पमल्पं स्वशम्बलम् ॥ ६० ॥**

अन्वयः-कुग्रामाः कुभवाः, ताप शीत वात आदि कष्ट जं अकाम निर्जरा पुण्यं अल्पं अल्पं स्वशंबलं. ॥ ६० ॥

अर्थः-वळी नरकआदिक कुगतिओरूप कुग्रामो जाणवां, अने त्यांना ताप, टाढ, तथा वायु आदिकना कष्टथी उत्पन्न थयेली अकामनिर्जराना पुण्यरूप स्वल्प स्वल्प शंबल (द्रव्यनी मूडी) जाणवुं. ॥ ६० ॥

**मानुष्यकभवो रत्नद्वीपस्तत्र कुपर्वताः । कुतीर्थानि कुरत्नानि तत्राज्ञानतपांसि च ॥ ६१ ॥**

अन्वयः-मानुष्यक भवः रत्नद्वीपः, तत्र कुतीर्थानि कुपर्वताः, च तत्र अज्ञान तपांसि कुरत्नानि. ॥ ६१ ॥

अर्थः—वळी मनुष्यभवने रत्नद्वीप जाणवो, अने तेमां मिथ्यादर्शनोने कुपर्वतो जाणवा, तथा त्यां अज्ञानतपोने कुरत्नो (पांचीका) जाणवा. ॥ ६१ ॥

**चारित्रं विटपो तत्र सद्गुरुः पुरुषो महान् । कृपा तत्प्रेयसी विश्वत्रयजन्तुहिता स्मृता ॥ ६२ ॥**

अन्वयः—तत्र चारित्रं विटपी, सद्गुरुः महान् पुरुषः, विश्व त्रय जंतु हिता कृपा तत् प्रेयसी स्मृता. ॥ ६२ ॥

अर्थः—त्यां चारित्ररूपी वृक्ष जाणवुं, अने सद्गुरुरूपी महान् पुरुष जाणवो, तथा त्रणे जगतना प्राणीओनुं हित करनारी दयारूपी तेनी स्त्री जाणवी. ॥ ६२ ॥

**सर्वज्ञशासनं यच्च स माणिक्यमहीधरः । ध्यानं कुद्दालकः कर्मखानोनां खनने क्षमः ॥ ६३ ॥**

अन्वयः—च यत् सर्वज्ञ शासनं, सः माणिक्य महीधरः, ध्यानं कर्म खानीनां खनने क्षमः कुद्दालकः. ॥ ६३ ॥

अर्थः—वळी जे सर्वज्ञप्रभुनुं शासन, तेने माणिक्यपर्वत जाणवो, अने शुभ ध्यानने कर्मोरूपी खाणो खोदवामां समर्थ कोदाळी जाणवी.

**सुतपोभ्यस्तु सत्पुण्या रत्नश्रेणिरदूषणा । सम्यक्त्वं तच्च रत्नाद्रिकोटौ रत्नं यदुत्तमम् ॥ ६४ ॥**

अन्वयः—तु सुतपोभ्यः सत्पुण्या अदूषणा रत्नश्रेणिः, च रत्न अद्रि कोटौ यत् उत्तमं रत्नं तत् सम्यक्त्वं. ॥ ६४ ॥

अर्थः—वळी उत्तम प्रकारना तपथी मळेलां उत्तम पुण्यरूपी निर्दोष रत्नोनी पंक्ति जाणवी, अने ते रत्नाचलनी मेखलामां जे उत्तम रत्न कह्युं, ते सम्यक्त्व जाणवुं. ॥ ६४ ॥

**पश्चातिचारसंहारो माणिक्याद्रिस्तुतिच्छलात् । सुरासुराच्यर्या लक्ष्मीर्या केवलज्ञानमेव तत् ॥ ६५ ॥**

अन्वयः—माणिक्य अद्रि स्तुति च्छलात् पंच अतिचार संहारः, या सुर असुर अर्च्या लक्ष्मीः, तत् केवलज्ञानं एव. ॥ ६७ ॥
अर्थः—ते माणिक्याचलनी प्रशंसाना मिषथी पांचे अतिचारोनो परिहार (सूचव्यो छे) अने देवो तथा दानवोथी पूजायेली जे लक्ष्मी कही, ते केवलज्ञानज (जाणवुं.) ॥ ६५ ॥

**यस्तत्सङ्गान्महानन्दः स मोक्षगमनोत्सवः । भव्यः कोऽपि भवेऽत्रैव कृतकृत्यो भवेदिति ॥ ६६ ॥**

अन्वयः—तत् संगात् यः महानंदः, सः मोक्ष गमन उत्सवः, इति कः अपि भव्यः अत्र एव भवे कृतकृत्यः भवेत्. ॥ ६६ ॥
अर्थः—ते केवलज्ञानना संगथी जे महान् आनंद कह्यो, ते मोक्षगमनरूप हर्ष जाणवो, अने ए रीते कोइक भव्य मनुष्य आ भवमांज कृतार्थ थइ शके छे. ॥ ६६ ॥

**आसन्नसिद्धिकस्तु स्यात्सस्पृहस्तपसां फले । भवेषु दिव्यद्रङ्गेषु भोगास्तन्मूल्यजं फलम् ॥ ६७ ॥**

अन्वयः—तु आसन्न सिद्धिकः तपसां फले सस्पृहः स्यात्, दिव्य द्रंगेषु भवेषु भोगाः, तत् मूल्यजं फलं. ॥ ६७ ॥
अर्थः—वळी नजीक सिद्धिवाळो मनुष्य तपना फलने इच्छनारो थाय छे, अने तेथी दिव्य नगरोमां जन्मीने जे भोगो ते भोगवे छे, ते तेना तपनी किम्मतनुं फल जाणवुं ॥ ६७ ॥

**सप्ताष्टवारं यामुष्य सुपुरेषु गतागतिः । पुण्योदयव्ययोत्थाना नरामरभवास्तु ते ॥ ६८ ॥**

अन्वयः-अमुष्य सुपुरेषु या सप्त अष्ट वारं गत आगतिः, ते तु पुण्य उदय व्यय उत्थानाः नर अमर भवाः. ॥ ६८ ॥

अर्थः-वळी ते माणसनुं उत्तम नगरोमां सात आठ वखत जे आवागमन थयुं, ते पुण्यना उदयरूप ( मळेलां द्रव्यना ) खरचाइ जवाथी थयेला मनुष्य अने देवोना भवो जाणवा. ॥ ६८ ॥

**दूरभव्यस्य यो दिव्यपुरीगमनमिच्छतः । पल्लीपातोऽल्पभोगर्द्धिभूतप्रेतादिजन्म तत् ॥ ६९ ॥**

अन्वयः-दिव्य पुरी गमनं इच्छतः दूर भव्यस्य यः पल्ली पातः, तत् अल्प भोग ऋद्धि भूत प्रेत आदि जन्म. ॥ ६९ ॥

अर्थः—दिव्य नगरमां जवानी इच्छा करता, एवा दूरभव्य मनुष्यनुं जे ( भिल्लोनी ) पल्लीमां जइ पडवुं कह्युं, ते स्वल्प भोगोनी समृद्धिवाळा भूत, प्रेत आदिकोना भवो जाणवा. ॥ ६९ ॥

**भ्रमन्भूरीन्भवान्दूरभव्योऽपि सुखदुःखभाक् । गुरोर्गिरं पुनः प्राप्य भव्यीभूय शिवं श्रयेत् ॥ ७० ॥**

अन्वयः—सुख दुःख भाक् दूर भव्यः अपि भूरीन् भवान् भ्रमन्, पुनः गुरोः गिरं प्राप्य भव्यीभूय शिवं श्रयेत्. ॥ ७० ॥

अर्थः—सुख दुःख भोगवतोथको ते दूरभव्य पण घणा भवोमां भमीने, पाछो गुरुमहाराजनो उपदेश पामीने भव्य थइ मोक्षे जइ शके छे. ॥ ७० ॥

**अभव्यस्तु गुरुद्वेषान्मर्त्यजन्माध्वदूरगः । विशत्यरण्ये दुर्जन्मचयसंचारनामनि ॥ ७१ ॥**

अन्वयः—तु अभव्यः गुरु द्वेषात् मर्त्य जन्म अध्व दूरगः, दुर्जन्म चय संचार नामनि अरण्ये विशति. ॥ ७१ ॥

अर्थः–अने अभव्य तो गुरुपरना द्वेषथी मनुष्यजन्मना मार्गथी दूर रह्योथको दुर्गतिओना समूहमां जन्मवारूप जंगलमां जइ पडे छे.

**दुःकर्मनामभिर्दुष्टजीवैस्तत्रातिघट्टितः । दुःखस्थानेषु कूपादिस्थानीयेषु पतत्यसौ ॥ ७२ ॥**

अन्वयः–तत्र दुःकर्म नामभिः दुष्ट जीवैः अतिघट्टितः असौ कूप आदि स्थानीयेषु दुःख स्थानेषु पतति. ॥ ७२ ॥

अर्थः—त्यां दुष्कर्मो नामना दुष्ट प्राणीओथी अत्यंत पीडित थयोथको ते कूवाआदिक स्थानसरखां ( नरकआदिकरूप ) दुःखमय स्थानोमां जइ पडे छे. ॥ ७२ ॥

**कष्टात्कष्टान्तरे स्पष्टं पतन्नेषु मुहुर्मुहुः । अयं कुजन्मनां पारं कदाचिदपि न व्रजेत् ॥ ७३ ॥**

अन्वयः—एषु स्पष्टं मुहुः मुहुः कष्टात् कष्टांतरे पतन् अयं कदाचित् अपि कुजन्मनां पारं न व्रजेत्. ॥ ७३ ॥

अर्थः–ते स्थानकोमां प्रगटपणे वारंवार एक दुःखमांथी बीजां दुःखमां पडतो थको ते अभव्य माणस कोइ वखते पण कुजन्मोनो पार पामी शकतो नथी. ॥ ७३ ॥

**इत्यन्तरङ्गदृष्टान्तमवबुध्य सुबुद्धयः । अहितत्यागतः सन्तः सन्तु स्वस्य हिते रताः ॥ ७४ ॥**

अन्वयः—इति अंतरंग दृष्टांतं अवबुध्य सुबुद्धयः संतः अहित त्यागतः स्वस्य हिते रताः संतु. ॥ ७४ ॥

अर्थः–एरीते आ अंतरंग दृष्टांतनुं मनन करीने उत्तम बुद्धिवाळा सज्जनो अहितनो त्याग करीने पोताना हितमां तत्पर थाओ ?

**॥ आ रीते चार प्रकारना जीवोना विचार संबंधि अंतरंग कथा कही. ॥**

॥ इति श्री शुद्धमत्यादिचतुष्टयचरित्रं समाप्तं ॥ आ चरित्र श्रीवासुपूज्यचरित्र नामनामहाकाव्यमांथी स्वपरना श्रेयने माटे तेना अन्वय तथा गुजराती भाषांतर करी जामनगर निवासी पंडितश्रावक हीरालाल हंसराजे पोताना श्रीजैनभास्करोदय प्रीन्टींग प्रेसमां छापी प्रसिद्ध कर्युं छे ॥ श्रीरस्तु ॥

॥ समाप्तोऽयं ग्रंथो गुरुश्रीमच्चारित्रविजयसुप्रसादात् ॥

॥ इति श्रीशुद्धमत्यादिचतुष्टय चारत्रं समाप्तम् ॥